# Prabhat Kids School, Akola 2025-26

(CBSE Affiliation No. 1130426)

Std.IX Section : ____________ Subject : Sanskrit Marks : 20

Date : ______________ Periodic Test - III

Name :____________________________________________ Roll No. ____________ Time : 1 Hr.

## खण्ड: 'क'

## (अपठित अवबोधनम्)

**प्रश्न १ : अधोलिखितं गद्यांशं पठित्वा उत्तराणि संस्कृतेन लिखत।** **५ अङ्का:**

भारतवर्षे षड् ऋतव: भवन्ति। तेषु वसन्त: ऋतुराज: कथ्यते। चैत्रे वैशाखे च मासे वसन्तस्य ऋतु: भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ भवत: – वसन्तोत्सव: होलिकोत्सव: च। वसन्तोत्सवे सर्वत्र प्रमादो भवति। नरा: नार्य: च सर्वत्र गायन्ति नृत्यन्ति च। होलिकोत्सव: फाल्गुनमासस्य पूर्णिमायां मान्यते। हर्षातिरेकेण नरा:, नार्य:, युवान:, वृद्धा: बालका: च प्रसन्ना: जायन्ते। जना: परस्परं रक्तवर्णं, रक्तचूर्णं च प्रक्षिपन्ति। द्वेषं विस्मृत्य सर्वे परस्परं मिलन्ति। रात्रौ जना: परस्परम् आमन्त्र्य प्रीतिभोजं कृत्वा आमोदं मानयन्ति। वार्तालापस्य माध्यमेन सर्वे जना: कण्ठेन मिलित्वा स्वजीवनं सुखमयं कुर्वन्ति।

**प्रश्ना:**

I) **एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **(१ अङ्क:)**

क) कं विस्मृत्य सर्वे परस्परं मिलन्ति?

ख) होलिकोत्सव: कस्यां तिथौ मान्यते?

ग) भारते कति ऋतव: भवन्ति?

II) **पूर्णवाक्येन उत्तरत। (केवलं प्रश्नैकम्)** **(१ अङ्क:)**

क) होलिकोत्सवे नरा: नार्य: च किं कुर्वन्ति?

ख) वार्तालापस्य माध्यमेन सर्वे जना: किं कुर्वन्ति?

III) **निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** **(२ अङ्का:)**

क) अनुच्छेदे 'ऋतुराज:' इति कस्य पदस्य विशेषणम्?

क) ऋतव: ख) वसन्त: ग) ऋतु: घ) वैशाख:

ख) 'प्रक्षिपन्ति' इति क्रियाया: अत्र अनुच्छेदे कर्तृपदं किम्?

क) जना: ख) सर्वे ग) नार्य: घ) परस्परम्

ग) 'अप्रसन्ना:' इति पदस्य क: विपर्यय: अनुच्छेदे अस्ति?

क) वृद्धा: ख) सुखमयम् ग) प्रसन्ना: घ) नरा:

IV) **उपरि लिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।** **(१ अङ्क:)**

Sample Paper Prabhat Kids School, Akola

## खण्ड: 'ख'

## (रचनात्मक कार्यम्)

**प्रश्न २ : निम्नचित्रं दृष्ट्वा मञ्जूषात: पदानि चित्वा सरल संस्कृते त्रीणिवाक्यानि लिखत।** **३ अङ्का:**

**(मञ्जूषा – दीपावली उत्सवस्य, महिला, बालक:, बालिका, दीपका:, सन्ति, प्रज्वलिता:, सर्वे, भवन्ति, प्रसन्ना:, गृहम्, कुर्वन्ति, जना:, सुसज्जितम्, विद्युद्द्दीपका:, स्फोटकान् चालयति)**



## खण्ड: 'ग'

## (अनुप्रयुक्त व्याकरणम्)

**प्रश्न ३ : अधोलिखितानि पदानि निर्देशानुसारं परिवर्तयित्वा उचितं उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **२ अङ्का:**

Sample Paper
Prabhat Kids School, Akola

१) पुष्पम् (द्वितीया बहुवचने)
क) पुष्पानाम् ख) पुष्पाणि ग) पुष्पेषु

२) बाल: (षष्ठी बहुवचने)
क) बालानाम् ख) बाले ग) बालस्य

३) लता (प्रथमा द्विवचने)
क) लताभ्याम् ख) लतयो: ग) लते

४) राम: (सप्तमी एकवचने)
क) रामेषु ख) रामयो: ग) रामे

५) वृक्ष: (सम्बोधनं बहुवचने)
क) हे वृक्षा: ! ख) हे वृक्षौ ! ग) हे वृक्ष: !

**प्रश्न ४ : अध: प्रदत्तेषु धातुरुपेषु उचितै: धातुरुपै: रिक्तस्थानानि पुरयत। (केवलं प्रश्नचतुष्टयम्)** **२ अङ्का:**

१) माता भोजनं ...........।
क) पचति ख) पचामि ग) पचन्ति

२) ता: महिला: गीतं ............।
क) गास्यति ख) गायन्ति ग) अगायत्

३) वयं भारतीया: ...............।

क) सन्ति        ख) अस्ति        ग) स्त:

४) अहं श्व: कोलकातानगरं ................।

क) गमिष्यति        ख) गमिष्यसि        ग) गमिष्यामि

५) गीता रमा च तत्र ........ ।

क) पठति        ख) अपठत्        ग) अपठताम्

**प्रश्न ५ : रेखाङ्कितपदानां प्रकृति–प्रत्ययौ संयोज्य विभाज्य वा उचितम् उत्तरं विकल्पेभ्य: चिनुत।**

**(केवलं प्रश्नद्वयम्)** **१ अङ्क:**

१) पठ्+शतृ छात्र: तूष्णीं तिष्ठति।

क) पठन्        ख) पठत        ग) पठित्वा

२) स: चलन् पितरं नमति।

क) चल्+शानच्        ख) चल+शतृ        ग) चल्+क्त

३) गुरुं सेव्+शानच् छात्र: प्रसन्न: भवति।

क) सेवमान:        ख) सेवमानम्        ग) सेवमाना

**खण्ड: 'घ'**

**(पठित अवबोधनम्)**

**प्रश्न ६ : अधोलिखितं गद्यांशं पठित्वा उत्तराणि लिखत।** **३ अङ्का:**

(तत: प्रविशति तपस्यारत: तपोदत्त:)

**तपोदत्त:** – अहमस्मि तपोदत्त:। बाल्ये पितृचरणै: क्लेश्यमानोऽपि विद्यां नाऽधीतवानस्मि। तस्मात् सर्वै: कुटुम्बिभि: मित्रै: ज्ञातिजनैश्च गर्हितोऽभवम्। (ऊर्ध्वं नि:श्वस्य)

हा विधे! किम् इदं मया कृतम्? कीदृशी दुर्बुद्धि: आसीत् तदा! एतदपि न चिन्तितं यत् –

परिधानैरलङ्कारैर्भूषितोऽपि न शोभते।

नरो निर्मणिभोगीव सभायां यदि वा गृहे।।

(किञ्चिद् विमृश्य)

भवतु, किम् एतेन? दिवसे मार्गभ्रान्त: सन्ध्यां यावद् यदि गृहमुपैति तदपि वरम्। नाऽसौ भ्रान्तो मन्यते। अतोऽहम् इदानीं तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्मि।

**प्रश्ना:**

**I) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **(१ अङ्क:)**

क) तपोदत्तस्य बुद्धि: कीदृशी आसीत्?

ख) स: किं कृत्वा विद्यां प्राप्तुम् प्रवृत्तोऽस्ति?

ग) क: बाल्ये विद्यां न अधीतवान्?

**II) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नैकम्)** **(१ अङ्क:)**

क) कीदृश: नर: न शोभते?

ख) तपोदत्त: कै: गर्हित: अभवत्?

Sample Paper
Prabhat Kids School, Akola

III) **भाषिक कार्यम्। (केवलं प्रश्नद्वयम्)** **(१ अङ्कः)**

क) 'शोभते' इति क्रियापदस्य कर्तृपदम् किम् ?

क) तपोदत्तः ख) सेतुः ग) पुरुषः

ख) 'सुबुद्धिः' इति पदस्य विपर्ययपदं अत्र किम् प्रयुक्तम् ?

क) उपैति ख) दुर्बुद्धिः ग) प्रवृत्तः

ग) 'नाऽसौ भ्रान्तो मन्यते।' अत्र क्रियापदं किमस्ति ?

क) नाऽसौ ख) भ्रान्तो ग) मन्यते

**प्रश्न ७ : रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नद्वयम्)** **२ अङ्काः**

१. <u>लतानां</u> नितान्तं शान्तिशीलं सुमं चलेत्।

२. सूर्योदयात् पूर्वमेव <u>बालिका</u> तत्रोपस्थिता।

३. <u>मोदकानि</u> पूजानिमित्तनि रचितानि आसन्।

**प्रश्न ८ : अधोलिखितं स्तम्भे पर्यायपदानि दत्तानि चित्वा समक्षे लिखत। (केवलं प्रश्नद्वयम्)** **१ अङ्काः**

| **क** | **ख** |
|---|---|
| १. सेतुः | क) बालुका |
| २. उपैति | ख) जलबन्धः |
| ३. सिकता | ग) समीपं गच्छति |

**प्रश्न ९ : निम्नलिखितानां शब्दानां विलोमपदं मञ्जूषातः चित्वा लिखत। (केवलं प्रश्नद्वयम्)** **१ अङ्काः**

**(मञ्जूषा – जलम्, शीतः, सेवकस्यः)**

१. स्वामिन : –

२. निदाघः –

३. अम्भः –

---------

Sample Paper
Prabhat Kids School, Akola